## दशमः पाठः

CEV46X

**प्रहेलिकाः**

वने वसति को वीरो योऽस्थि-मांस-विवर्जितः।

असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गतः ।।1।।

न तस्यादिः न तस्यान्तः मध्ये यः तस्य तिष्ठति।

तवाप्यस्ति ममाप्यस्ति यदि जानासि तद् वद।।2।।

एकचक्षुर्न काकोऽयं बिलमिच्छन् न पन्नगः।

क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः।।3।।

प्रकाशः शीतलः यस्य यः कलाभिः च वर्धते।

तापं हरति सर्वेषां चकोरस्य प्रियः स कः।।4।।

वृक्षाग्रवासी न च पक्षिराजः

त्रिनेत्रधारी न च शूलपाणिः।

त्वग्वस्त्रधारी न च सिद्धयोगी

जलं च बिभ्रन्न घटो न मेघः।। 5 ।।

शब्दार्थः

**वने** = जंगल में, जल में **अस्थि** = हड्डी **असिवत्** = तलवार की भाँति **न** = न अक्षर **तस्य** = उस पद के **आदिः** = आरम्भ में **तस्यान्तः** = उसके अन्त में **मध्ये** = बीच में **तव अपि अस्ति** = तुम्हारे पास भी है **एकचक्षुः** = एक आँख वाला **पन्नगः** = साँप **क्षीयते** = घटता है **कलाभिः च वर्धते** = कलाओं से बढ़ता है **चकोरस्य** = चकोर का **सः कः?** = वह कौन है? **वृक्षाग्रवासी** = वृक्ष के अगले हिस्से पर रहता है**पक्षिराजः** = पक्षियों का राजा**त्रिनेत्रधारी** = तीन आँखों वाला**शूलपाणिः** = भगवान शङ्कर**त्वग्-वस्त्रधारी** = छाल, (वल्कल) वस्त्र वाला **बिभ्रन्** = भरा हुआ **न घटः** = (वह) घड़ा नहीं है **न मेघः** = (वह) बादल नहीं है

**अन्वयः**

(1) कः वीरः वने वसति, यः अस्थि-मांस-विवर्जितः (अस्ति) असिवत् कार्यं कुरुते, कार्यं कृत्वा वनं गतः।

(2) तस्य आदिः 'न' (वर्णः) तस्यान्तः 'न' (वर्णः) तस्य मध्ये 'य' (वर्णः) तिष्ठति। तव अपि अस्ति, मम अपि

अस्ति, यदि जानासि तद् वद।

(3) एकचक्षुः (अस्ति परन्तु) अयं न काकः, बिलम् इच्छन् न पन्नगः, य क्षीयते वर्धते च एव (परन्तु सः) न समुद्रः चन्द्रमा अस्ति।

(4) यस्य प्रकाशः शीतलः (अस्ति), यः कलाभिः च वर्धते। सर्वेषां तापं हरति, यः चकोरस्य प्रियः (अस्ति), सः कः अस्ति ?

(5) वृक्षाग्रवासी (अस्ति), न च पक्षिराजः। त्रिनेत्रधारी (अस्ति परं) न च शूलपाणिः। त्वग्वस्त्रधारी (अस्ति परं)

न च सिद्धयोगी (अस्ति)। जलं च बिभ्रन् (अस्ति परं) न घटः न वा मेघः अस्ति।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

योऽस्थि, विवर्जितः, तवाप्यस्ति,ममाप्यस्ति, एकचक्षुर्न, बिलमिच्छन्,वृक्षाग्रवासी, त्वग्वस्त्रधारी, बिभ्रन्न।

**2. पूर्णवाक्येन उत्तरत -**

यथा-कः वीरः असिवत् कार्यं करोति ? कुम्भकारस्य तन्तु

(क) यस्य आदौ 'न' अस्ति तथा अन्ते 'न' अस्ति एवं मध्ये 'य' अस्ति, सः कः अस्ति?

(ख) यस्य प्रकाशः शीतलः अस्ति तथा च कलाभिः वर्धते, सः कः अस्ति?

(ग) कः वृक्षाग्रवासी अस्ति परं पक्षिराजः नास्ति?

**3. मञ्जूषातः समानार्थक-पदानि चित्वा लिखत-**

नीरम्, जलधिः, शशिः, घनः, नेत्रम्।

यथा- समुद्रः - जलधिः

चन्द्रः - ..................

मेघः - ..................

जलम् - ..................

चक्षुः - ..................

**4. विलोमपदानि परस्परं योजयत-**

वीरः आगतः

गतः तप्तः

प्रकाशः अप्रियः

शीतलः कायरः

प्रियः अन्धकारः

**5. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

तस्यान्तः ..................................

चैव .........................................

वृक्षाग्रवासी .............................

**6. पाठात् क्रियापदानि चित्वा लिखत-**

यथा- वसति- .......... .......... .......... ............. ...........

**7-वाक्यानि पूरयत-**

(क) प्रकाशः शीतलः यस्य यः ..........च वर्धते।

(ख) .................. न च पक्षिराजः।

**शिक्षण संङ्.केत-**

(क) छात्रैः समानार्थकानाम् अन्यहिन्दी-प्रहेलिकानां संग्रहं कारयत।

(ख) प्रहेलिकायाः उत्तराणि-1 कुम्भकारस्य तन्तु (कुम्भकार का डोरा),

2 नयनम् (नयन), 3 सूचिका-तन्तुः (सूई-डोरा),

4 चन्द्रः (चन्द्रमा), 5 नारिकेलः (नारियल)

**मनोरञ्जनाय**

## हास्यं सुध्युपास्यम् (चुटकुला)

एकः शिक्षकः पत्रं लिखित्वा कस्यचिद् छात्रस्य गृहम् प्रेषितवान् छात्रस्य च पितरं प्रतिवेदनम् अकरोत्। अन्येद्युः पिता आगत्य अध्यापकम् अपृच्छत्-किमेतत्पत्रं भवतैव लिखितम्? अध्यापकः- आम्। पिता-तर्हि अस्मिन् पत्रे किं लिखितम्, पठित्वा कथयतु। अस्पष्टलिपिकारणात् अध्यापकः अतीव कठिनतया पत्रम् अपठत् अवदत् च-अस्मिन् पत्रे भवते इदमेव प्रतिवेदितं यत् भवतः बालस्य लिपिः समीचीना नास्ति।

भावार्थ- एक अध्यापक ने किसी लड़के के घर पर पत्र लिखकर भेजा और लड़के के पिता से शिकायत की। दूसरे दिन पिता ने अध्यापक से पूछा - क्या यह पत्र आपने ही लिखा है ? अध्यापक- हाँ। पिता- तो इस पत्र में पढ़कर तो बताइए क्या लिखा है? लिखावट ठीक नहीं थी, अतः अध्यापक ने बड़ी मुश्किल से पढ़ा और कहा कि इस पत्र में आपको यही शिकायत लिखकर भेजी गयी है कि आपके लड़के की लिखावट बहुत खराब है।